CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 111.

YAJURVEDA SAMHITA-(KRSNA
YAJARVEDA)

Title ~~FOURTH ASTAKA & YAJNOPAVIT~~
-TA PRATISTHA VIDHI.

CHUNILAL GANDHI VIDYABHAVAN
SURAT.
Manuscripts Library
S.D.P.B.
Coll. No. 111.
YAJURVEDA SAMHITA-(KRSNA
YAJARVEDA)
Title FOURTH ASTAKA & YAJNOPAVIT
-TA PRATISTHA VIDHI.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 111 Subject: Veda.

Title: Yajurveda-'Caturthāṣṭaka.

Author: — Scribe: Rāmakṛṣṇa

Date of the work: — Date of the Ms.: Saṃvat 1595

Place of the work: — Place of the Ms.: Ayodhyāpura Mahā Nagarī

Size: 13" by 5.3" Extent: 13+1 folia.

Language: Sanskrit. Script: Devanagari.

Remarks: Complete.

॥[illegible]

॥ श्रीमहागणपतयेनमः ॥ हरिः ॐ युंजानःप्रथमंमनस्तत्त्वायसविताधियः ॥ अग्निंज्योतिर्निचाय्यपृथिव्याऽअध्याभरत ॥ युक्त्वायमनसादेवान्सुवर्यतोधि
यादिवं ॥ बृहज्ज्योतिःकरिष्यतःसविताप्रसुवातितान् ॥ युक्तेनमनसावयंदेवस्यसवितुःसवे ॥ सुवर्गेयायशक्त्यै ॥ युंजतेमनऽउतयुंजतेधियोविप्राविप्र
स्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकऽइत् ॥ १ ॥ महीदेवस्यसवितुःपरिष्टुतिः ॥ युजेवांब्रह्मपूर्व्यंनमोभिर्विश्लोकायंतिपथ्येवसूराः ॥ शृण्वं
तिविश्वेऽअमृतस्यपुत्राऽआयेधामानिदिव्यानितस्थुः ॥ यस्यप्रयाणमन्वन्यऽइद्ययुर्देवादेवस्यमहिमानमर्चतः ॥ यःपार्थिवानिविममेसऽएतशोर
जांसिदेवःसवितामहित्वना ॥ देवसवितःप्रसुवयज्ञंप्रसुव ॥ २ ॥ यज्ञपतिंभगायदिव्योगंधर्वः ॥ केतपूःकेतन्नःपुनातुवाचस्पतिर्वाचमद्यस्वदातिनः ॥
इमन्नोदेवसवितर्यज्ञंप्रसुवदेवायुवंसखिविदंसत्राजितंधनजितंस्वर्जितं ॥ ऋचास्तोमंसमर्द्धयगायत्रेणरथंतरं ॥ बृहद्गायत्रवर्त्तनि ॥ देव
वस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांगायत्रेणछंदसाददेंगिरस्वदभ्रिरसिनारिः ॥ ३ ॥ अभिपृथिव्याःसधस्थादग्निंपुरीष्यमंगिरस्वदाभरत्रै
ष्टुभेनत्वाछंदसाददेंगिरस्वद्भ्रिरसिनारिरसित्वयावयंसधस्थऽआग्निंशकेमखनितुंपुरीष्यंजागतेनत्वाछंदसाददेंगिरस्वद्धस्तऽआधायसविताबि
भ्रदभ्रिंहिरण्ययीं ॥ तयाज्योतिरजस्रमिदग्निंखात्वीनऽआभरानुष्टुभेनत्वाछंदसाददेंगिरस्वत् ॥ ४ ॥ इदद्यज्ञंप्रसुवतारिरानुष्टुभेनत्वाछंदसात्रीणित्व १

इमामगृभ्णन्रशनामृतस्यपूर्वऽआयुषिविदथेषुकव्या ॥ तयादेवाःसुतमाबभूवुर्ऋतस्यसामन्सरमारपंती ॥ प्रतूर्त्तंवाजिन्नाद्रववरिष्ठामनुसंवस
तं ॥ दिवितेजन्मपरममंतरिक्षेतवनाभिःपृथिव्यामधियोनिः ॥ युंजाथांरासभंयुवमस्मिन्यामेवृषण्वसू ॥ अग्निंभरंतमस्मयुं ॥ योगेयोगेतवस्तरंवा
जेवाजेहवामहे ॥ सखायऽइंद्रमूतये ॥ प्रतर्वन् ॥ १ ॥ एह्यवक्रामन्नशस्तीरुद्रस्यगाणपत्यान्मयोभूरेहि ॥ उर्वंतरिक्षमन्विहिस्वस्तिगव्यूतिरभया
निकृण्वन् ॥ पूष्णासयुजासह ॥ पृथिव्याःसधस्थादग्निंपुरीष्यमंगिरस्वदच्छेह्यग्निंपुरीष्यमंगिरस्वदच्छेमोग्निंपुरीष्यमंगिरस्वद्भरिष्यामोग्निंपुरीष्य
मंगिरस्वद्भरामः ॥ अन्वग्निरुषसामग्रमख्यदन्वहानिप्रथमोजातवेदाः ॥ अनुसूर्यस्य ॥ २ ॥ पुरुत्राचरश्मीनन्नुद्यावापृथिवीऽआततान ॥ आगत्यवा
ज्यध्वनःसर्वामृधोविधूनुते ॥ अग्निंसधस्थेमहतिचक्षुषानिचिकीषते ॥ आक्रम्यवाजिन्पृथिवीमग्निमिच्छरुचात्वं ॥ भूम्यावृत्वायनोब्रूहियतः
खनामतंवयं ॥ द्यौस्तेपृष्ठंपृथिवीसधस्थमात्मांतरिक्षंसमुद्रोयोनिः ॥ विख्यायचक्षुषात्वमभितिष्ठ ॥ ३ ॥ पृतन्यतः ॥ उत्क्राममहतेसौभगाया
स्मादास्थानाद्द्रविणोदावाजिन् ॥ वयंस्यामसुमतौपृथिव्याऽअग्निंखनिष्यंतऽउपस्थेऽअस्याः ॥ उदक्रमीद्द्रविणोदावाज्यर्वाकःसलोकंसुकृ
तंपृथिव्याः ॥ ततःखनेमसुप्रतीकमग्निंस्वोरुहाणाऽअधिनाकऽउत्तमे ॥ आपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजाभ्यः ॥ तासामास्थानादु

जिन्वतामोषधयःसुपिप्पलाः॥ जिघर्म्मि॥४॥ अग्निम्मनसाघृतेनप्रतिक्ष्यन्तम्भुवनानिविश्वा॥ पृथुन्तिरश्चावयसाबृहन्तंव्यचिष्ठमन्नꣳरभसंविदानं॥
आत्वाजिघर्म्मिवचसाघृतेनारक्षसामनसातज्जुषस्व॥ मर्य्यश्रीस्पृहयद्वर्णोऽअग्निर्नाभिमृशेतन्वाजर्ह्हषाणः॥ परिवाजपतिःकविरग्निर्हव्यान्यक्रमी
त्॥ दधद्रत्नानिदाशुषे॥ परित्वाग्नेपुरंवयंविप्रꣳसहस्यधीमहि॥ धृषद्वर्णंदिवेदिवेभेत्तारम्भङ्गुरावतः॥ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वम
श्मनस्परि॥ त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वन्नृणान्नृपतेजायसेशुचिः॥५॥ पत्त्वर्वन्नस्य्यस्यतिष्ठतिघर्म्मिभेत्तारंविꣳश्चातिश्च॥२॥ देवस्यत्वासवितुःप्रस
वेऽश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्पृथिव्याःसधस्थेग्निम्पुरीष्यमङ्गिरस्वत्खनामि॥ ज्योतिष्मन्तन्त्वाग्नेसुप्रतीकमजस्रेणभानुनादीद्यतं॥ शिवम्प्रजाभ्यो
हिꣳसन्तम्पृथिव्याःसधस्थेग्निम्पुरीष्यमङ्गिरस्वत्खनामि॥ अपाम्पृष्ठमसिसप्रथाऽउर्वग्निम्भरिष्यदपरावपिष्ठं॥ वर्द्धमानम्महऽआचपुष्करंदिवोमात्रया
वरिणाप्रथस्व॥ शर्म्मचस्थः॥१॥ वर्म्मचस्थोऽअछिद्रेबहुलेऽउभे॥ व्यचस्वतीसंवसाथाम्भर्त्तमग्निम्पुरीष्यं॥ संवसाथाꣳस्वर्विदासमीचीऽउरसात्म
ना॥ अग्निमन्तर्भरिष्यन्तीज्योतिष्मन्तमजस्रमित्॥ पुरीष्योसिविश्वभराः॥ अथर्वात्वाप्रथमोनिरमन्थदग्ने॥ त्वामग्नेपुष्करादध्यथर्वानिरमन्थत॥ मू
र्ध्नोविश्वस्यवाघतः॥ तमुत्वादध्यङ्ङृषिःपुत्रऽईधे॥२॥ अथर्वणः॥ वृत्रहणम्पुरन्दरं॥ तमुत्वापाथ्योवृषासमीधेदस्युहन्तमं॥ धनञ्जयꣳरणेरणे॥ मी

दद्धोतःसऽउलोकेविकित्वान्सादयायज्ञꣳसुकृतस्ययोनौ॥ देवावीर्द्देवान्हविषायजास्यग्नेबृहद्यजमानेवयोधाः॥ निहोताहोतृषदनेविदा
नस्त्वेषोदीदिवाꣳअसदत्सुदक्षः॥ अदब्धव्रतप्रमतिर्वसिष्ठःसहस्रम्भरःशुचिजिह्वोऽअग्निः॥ संꣳसीदस्वमहाꣳअसिशोचस्व॥३॥ देववीतमः
विधूममग्नेऽअरुषम्मियेध्यसृजप्रशस्तदर्शतं॥ जनिष्वाहिजेन्योऽअग्रेऽअह्नाꣳहितोहितेष्वरुषोवनेषु॥ दमेदमेसप्तरत्नादधानोग्निर्होतानिषसा
दायजीयान्॥४॥ स्यऽईधेशोचस्वसप्तविꣳश्चातिश्च॥३॥ संतेवायुर्म्मातरिश्वादधातूत्तानायैहृदयंयद्विलिष्टं॥ देवानाम्पश्चरतिप्राणथेनतस्मै
चदेविवषडस्तुतुभ्यं॥ सुजातोज्योतिषाशर्म्मवरूथमासदःस्वः॥ वासोऽअग्नेविश्वरूपꣳसंव्ययस्वविभावसो॥ उदुतिष्ठस्वध्वरावानोदेव्याकृपा
दृशेचभासाबृहताशुशुक्वनिरग्नेयाहिसुशस्तिभिः॥ ऊर्ध्वऊषुणऊतयेतिष्ठादेवोनसविता॥ ऊर्ध्वोवाजस्यसनितायदञ्जिभिर्वाघद्भिर्विह्वयाम
हे॥ सजातोगर्भोऽअसिरोदस्योरग्नेचारुविभृतऽओषधीषु॥ चित्रःशिशुःपरितमाꣳस्यक्तूःप्रमातृभ्योऽअधिकनिक्रदद्गाः॥ स्थिरोभववीड्वङ्गऽआ
शुर्भववाज्यर्वन्॥ पृथुर्भवसुषदस्त्वमग्नेःपुरीषवाहनः॥ शिवोभव॥२॥ प्रजाभ्योमानुषीभ्यस्त्वमङ्गिरः॥ माद्यावापृथिवीऽअभिशूशुचोमान्तरिक्षं
मावनस्पतीन्॥ प्रैतुवाजीकनिक्रदन्नानदद्रासभःपत्वा॥ भरन्नग्निम्पुरीष्यम्मापाद्यायुषःपुरा॥ रासभोवांकनिक्रदत्सुयुक्तोवृषणारथे॥ सवमग्नि

पुरीष्यमाश्रुईतोवहादितः ॥ वृषाग्निंवृषणंभरंतपांगर्भसमुद्रियं ॥ अग्नऽआयाहि ॥ ३ ॥ वीतयऽऋतᳪसत्यं ॥ ओषधयःप्रतिगृह्णीताग्निमेतᳪशिवमा
यंतमभ्यत्रयुष्मान ॥ व्यस्यन्विश्वाऽअमतीररातीर्निषीदन्नोऽअपदुर्मतिᳪहनत ॥ ओषधयःप्रतिमोदध्वमेनंपुष्पावतीःसुपिप्पलाः ॥ अयंवोग
र्भऋत्वियःप्रत्नᳪसधस्थमासदत ॥ ४ ॥ शुश्रास्त्रिभिःशिवोभवयाद्विषद्भ्रिᳪश्राद्ध ॥ ४ ॥ विपाजसापृथुनाशोशुचानोबाधस्वद्विषोरक्षसोऽ
अमीवाः ॥ सुशर्मणोबृहतःशर्मणिस्यामग्नेरहःसुहवस्यप्रणीतो ॥ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशि
वतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माऽअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ मित्रः ॥ १ ॥ संसृज्यपृ
थिवींभूमिंचज्योतिषासह ॥ सुजातंजातवेदसमग्निंवैश्वानरंविभुं ॥ अयक्ष्मायत्वासᳪसृजामिप्रजाभ्यः ॥ विश्वेत्वादेवावैश्वानराःसᳪसृजंत्वा
नुष्टुभेनछंदसांगिरस्वत ॥ रुद्राःसंभृत्यपृथिवींबृहज्ज्योतिःसमीधिरे ॥ तेषांभानुरजस्रऽइच्छुक्रोदेवेषुरोचते ॥ सᳪसृष्टांवसुभीरुद्रैर्धीरैःकर्म
ण्यांमृदं ॥ हस्ताभ्यांमृद्वींकृत्वासिनीवालीकरोतु ॥ २ ॥ तां ॥ सिनीवालीसुकपर्दासुकुरीरास्वौपशा ॥ सातुभ्यमदितेमह्यऽओखांदधातुह
स्तयोः ॥ उखांकरोतुशक्त्याबाहुभ्यामदितिर्धिया ॥ मातापुत्रंयथोपस्थेसाग्निंबिभर्तुगर्भऽआ ॥ मखस्यशिरोसियज्ञस्यपदेस्थः ॥ वसवस्त्वाकृ

ण्वंतुगायत्रेणछंदसांगिरस्वत्पृथिव्यसिध्रुवोरसिरुद्रास्त्वाकृण्वंतुत्रैष्टुभेनछंदसांगिरस्वदंतरिक्षमसि ॥ २ ॥ आदित्यास्त्वाकृण्वंतुजागतेनछंदसांगिरस्वद्वि
श्वेत्वादेवावैश्वानराःकृण्वंत्वानुष्टुभेनछंदसांगिरस्वद्दिशोसिध्रुवासिधारयामयिप्रजाᳪरायस्पोषंगौपत्यᳪसुवीर्यᳪसजातान्यजमानायादित्यैरास्ना
स्यदितिस्तेबिलंगृह्णातुपांक्तेनछंदसांगिरस्वत ॥ कृत्वायसामहीमुखांमृन्मयींयोनिमग्नये ॥ तांपुत्रेभ्यःसंप्रायछददितिःश्रपयानिति ॥ ४ ॥ मित्रःकरो
खांतरिक्षमसिप्रवत्वारित्व ॥ ५ ॥ वसवस्त्वाधूपयंतुगायत्रेणछंदसांगिरस्वद्रुद्रास्त्वाधूपयंतुत्रैष्टुभेनछंदसांगिरस्वदादित्यास्त्वाधूपयंतुजागतेनछंद
सांगिरस्वद्विश्वेत्वांदेवावैश्वानराधूपयंत्वानुष्टुभेनछंदसांगिरस्वदिंद्रस्त्वाधूपयत्वंगिरस्वद्विष्णुस्त्वाधूपयत्वंगिरस्वद्वरुणस्त्वाधूपयत्वंगिरस्वददितिस्त्वा
देवाविश्वदेव्यावतीःपृथिव्याःसधस्थेंगिरस्वत्खनत्ववट ॥ देवानांत्वापत्नीः ॥ १ ॥ देवीर्विश्वदेव्यावतीःपृथिव्याःसधस्थेंगिरस्वद्दधतूखेधिषणास्त्वादेवी
र्विश्वदेव्यावतीःपृथिव्याःसधस्थेंगिरस्वदभींधतामुखेग्नास्त्वादेवीर्विश्वदेव्यावतीःपृथिव्याःसधस्थेंगिरस्वच्छ्रपयंतूखेवरुत्रयोजनयस्त्वादेवीर्विश्वदेव्यावतीः
पृथिव्याःसधस्थेंगिरस्वत्पचंतूखे ॥ मित्रैतामुखांपचैषामाभेदि ॥ एतांतेपरिददाम्यभित्यै ॥ अभीमां ॥ २ ॥ मह्निनादिवंमित्रोबभूवसप्रथाः ॥ उतश्रवसापृथि
वीं ॥ मित्रस्यचर्षणीधृतःश्रवोदेवस्यसानसिं ॥ द्युम्नंचित्रश्रवस्तमं ॥ देवस्त्वासवितोद्वपतुसुपाणिःस्वंगुरिः ॥ सुबाहुरुतशक्त्या ॥ अपद्यमानापृथिव्याशादि

त्राऽआपृण ॥ उत्तिष्ठबृहतीभवोर्ध्वातिष्ठध्रुवात्वं ॥ वसवस्त्वाछंदंतुगायत्रेणछंदसांगिरस्वद्रुद्रास्त्वाछंदंतुत्रैष्टुभेनछंदसांगिरस्वदादित्यास्त्वाछंदं
तुजागतेनछंदसांगिरस्वद्विश्वेत्वादेवावैश्वानराऽआछंदंत्वानुष्टुभेनछंदसांगिरस्वत ॥ ३ ॥ पत्नीरिमांऽरुद्रास्त्वाछंदंत्वेकाल्लविश्वातिथ्य ॥ ६ ॥
समास्त्वाग्नऋतवोवर्धयंतुसंवत्सराऽऋषयोयानिसत्या ॥ संदिव्येनदीदिहिरोचनेनविश्वाऽआभाहिप्रदिशःपृथिव्याः ॥ संचेध्यस्वाग्नेप्रचबोध
यैनमुच्चतिष्ठमहतेसौभगाय ॥ माचरिषदुपसत्तातेऽअग्नेब्रह्माणस्तेयशसःसंतुमान्ये ॥ त्वामग्नेवृणतेब्राह्मणाऽइमेशिवोऽअग्ने ॥ १ ॥ संवरणेभवानः
सपत्नहानोऽअभिमातिजिच्चस्वेगयेजागृह्यप्रयुछन ॥ इहैवाग्नेऽअधिधारयारयिंमात्वानिक्रन्पूर्वचित्तोनिकारिणः क्षत्रमग्नेसुयममस्तुतुभ्यमुपस
त्तावर्धतांतेऽअनिष्टृतः ॥ क्षत्रेणाग्नेस्वायुःसंरभस्वमित्रेणाग्नेमित्रधेयेयतस्व ॥ सजातानांमध्यमस्थाऽएधिराज्ञामग्नेविहव्योदीदिहीहाऽअति
॥ २ ॥ निहोऽअतिस्रिधोऽत्यचित्तिमत्यरातिमग्ने ॥ विश्वाह्यग्नेदुरितासहस्वाथास्मभ्यंसहवीरांरयिंदाः ॥ अनाधृष्योजातवेदाऽअनिष्टृतोविराडग्ने
क्षत्रभृद्दीदिहीह ॥ विश्वाऽआशाःप्रमुंचन्मानुषीर्भियःशिवाभिरद्यपरिपाहिनोवृधे ॥ बृहस्पतेसवितर्बोधयैनंसंशितंचित्संतरांसंशिशाधि ॥
वर्धयैनंमहतेसौभगाय ॥ ३ ॥ विश्वऽएनमनुमदंतुदेवाः ॥ अमुत्रभूयादधयद्यमस्यबृहस्पतेऽअभिशस्तेरमुंचः ॥ प्रत्यौहतामश्विनामृत्युमस्मा

द्देवानामग्नेभिषजाशचीभिः ॥ उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं ॥ ४ ॥ इमेशिवोऽअग्नेतिसौभगायचतुस्त्रिंशत्रा
त्व ॥ १ ॥ ऊर्ध्वाऽअस्यसमिधोभवंत्यूर्ध्वाशुक्राशोचींष्यग्नेः ॥ द्युमत्तमासुप्रतीकस्यसूनोः ॥ तनूनपादसुरोविश्ववेदादेवोदेवेषुदेवः ॥ पथऽआनक्तिमध्वा
घृतेन ॥ मध्वायज्ञंनक्षसेप्रीणानोनराशंसोऽअग्नेसुकृद्देवःसविताविश्ववारः ॥ अच्छायमेतिशवसाघृतेनेडानोवह्निर्नमसा ॥ अग्निंस्रुचोऽअध्वरे
षुप्रयत्सु ॥ सयक्षदस्यमहिमानमग्नेःसः ॥ १ ॥ ईंमंद्रासुप्रयसः ॥ वसुश्चेतिष्ठोवसुधातमश्च ॥ द्वारोदेवीरन्वस्यविश्वेव्रतादंदंतेऽअग्नेः ॥ उरुव्यचसोधाम्ना
पत्यमानाः ॥ तेऽअस्ययोषणेदिव्येनयोनाउषासानक्ता ॥ इमंयज्ञमवतामध्वरंनः ॥ दैव्याहोताराऊर्ध्वमध्वरंनोग्नेर्जिह्वामभिगृणीतं ॥ कृणुतंनःस्वि
ष्टिं ॥ तिस्रोदेवीर्बर्हिरेदंसदंत्विडासरस्वती ॥ २ ॥ भारती ॥ महीगृणाना ॥ तन्नस्तुरीपमद्भुतंपुरुक्षुत्वष्टासुवीरं ॥ रायस्पोषंविष्यतुनाभिमस्मे ॥ वनस्पते
वसृजारराणस्त्मनादेवेषु ॥ अग्निर्हव्यंशमितासूदयाति ॥ अग्नेस्वाहाकृणुहिजातवेदऽइंद्रायहव्यं ॥ विश्वेदेवाहविरिदंजुषंतां ॥ हिरण्यगर्भःसमव
र्तताग्रेभूतस्यजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवींद्यां ॥ ३ ॥ उतेमांकस्मैदेवायहविषाविधेम ॥ यःप्राणतोनिमिषतोमहित्वैकऽइद्राजाजगतोबभूव
यऽईशेऽअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम ॥ यऽआत्मदाबलदायस्यविश्वऽउपासतेप्रशिषंयस्यदेवाः ॥ यस्यछायामृतंयस्यमृत्युः

कस्मैदेवायहविषाविधेम ॥ यस्येमेहिमवंतोमहित्वायस्यसमुद्रꣳरसयासह ॥ ४ ॥ आहुः ॥ यस्येमाःप्रदिशोयस्यबाहूकस्मैदेवायहविषाविधे
म ॥ यंक्रंदसीऽअवसातस्तभानेऽअभ्यैक्षेतांमनसारेजमाने ॥ यत्राधिसूरऽउदितोव्येतिकस्मैदेवायहविषाविधेम ॥ येनद्यौरुग्रापृथिवीचदृढेयेन
सुवस्तभितंयेननाकः ॥ योऽअंतरिक्षेरजसोविमानःकस्मैस्मदेवायहविषाविधेम ॥ आपोहयन्महतीर्विश्वं ॥ ५ ॥ आयंदक्षंदधानाजनयंतीरग्निं ॥ ततो
देवानांनिरवर्त्ततासुरेकःकस्मैदेवायहविषाविधेम ॥ यश्चिदापोमहिनापर्यपश्यद्दक्षंदधानाजनयंतीरग्निं ॥ योदेवेष्वधिदेवऽएकऽआसीत्कस्मैदे
वायहविषाविधेम ॥ ६ ॥ अग्नेःससरस्वतीघ्याꣳसहविश्वंचतुस्त्रिꣳशाद्य ॥ ८ ॥ आकूतिमग्निंप्रयुजꣳस्वाहामनोमेधामग्निंप्रयुजꣳस्वाहाचित्तंविज्ञात
मग्निंप्रयुजꣳस्वाहावाचोविधृतिमग्निंप्रयुजꣳस्वाहाप्रजापतयेमनवेस्वाहाग्नयेवैश्वानरायस्वाहाविश्वेदेवस्यनेतुर्मर्त्तोवृणीतसख्यंविश्वेरायऽइषु
ध्यसिद्युम्नंवृणीतपुष्यसेस्वाहामासुभित्थामासुरिषोदृꣳहस्ववीड्यस्वसु ॥ अंबधृष्णुवीरयस्व ॥ १ ॥ अग्निश्चेदंकरिष्यथः ॥ दृꣳहस्वदेविपृथिविस्वस्त
यऽआसुरीमायास्वधयाकृतासि ॥ जुष्टंदेवानामिदमस्तुहव्यमरिष्टात्वमुदिहियज्ञेऽअस्मिन् ॥ मित्रैतामुखांतपैषामाभेदि ॥ एतांतेपरिददाम्यभित्त्यै
द्रंतःसर्पिरासुतिःप्रत्नोहोतावरेण्यः ॥ सहसस्पुत्रोऽअद्भुतः ॥ परस्याऽअधिसंवतोवराꣳअभ्या ॥ २ ॥ तर ॥ यत्राहमस्मिताꣳअव ॥ परमस्याःपरावति

रोहिदश्वऽइहागहि ॥ पुरीष्यःपुरुप्रियोग्नेत्वंतरामृधः ॥ सीदत्वंमातुरस्याऽउपस्थेविश्वान्यग्नेवयुनानिविद्वान् ॥ मैनामर्चिषामातपसाभिशूशुचोंतर
स्याꣳशुक्रज्योतिर्विभाहि ॥ अंतरग्नेरुचात्वमुखायैसदनेस्वे ॥ तस्यास्त्वꣳहरसातपंजातवेदःशिवोभव ॥ शिवोभूत्वामह्यमग्नेथोसीदशिवस्त्वं ॥
शिवाःकृत्वादिशःसर्वाःस्वांयोनिमिहासदः ॥ ३ ॥ वीरयस्वातपत्विꣳत्राथिश्च ॥ ९ ॥ यदग्नेयानिकानिचातेदारूणिदध्मसि ॥ तदस्तुतुभ्यमि
द्घृतंतज्जुषस्वयविष्ठ ॥ यदत्त्युपजिह्विकायद्वम्रोऽअतिसर्पति ॥ सर्वंतदस्तुतेघृतंतज्जुषस्वयविष्ठ ॥ रात्रिꣳरात्रिमप्रयावंभरंतोश्वायेवतिष्ठते
घासमस्मै ॥ रायस्पोषेणसमिषामदंतोग्नेमातेप्रतिवेशारिषाम ॥ नाभा ॥ १ ॥ पृथिव्याःसमिधानमग्निꣳरायस्पोषायबृहतेहवामहे ॥ इरंमदंबृ
हदुक्थंयजत्रंजेतारमग्निंपृतनासुसासहिं ॥ याःसेनाऽअभीत्वरीराव्याधिनीरुगणाऽउत ॥ येस्तेनायेचतस्करास्तांस्तेऽअग्नेपिदधाम्यास्ये ॥ दꣳष्ट्रा
भ्यांमलिम्लूञ्जंभ्यैस्तस्कराꣳउत ॥ हनुभ्याꣳस्तेनान्भगवस्तांस्त्वंखादसुखादितान् ॥ येजनेषुमलिम्लवस्तेनासस्तस्करावने ॥ २ ॥ कल्वेष्वघायव
स्तांस्तेदधामिजंभयोः ॥ योऽअस्मभ्यमरातीयाद्यश्चनोद्वेषतेजनः ॥ निंदाद्योऽअस्मांदिप्साच्चसर्वंतंमस्मसाकुरु ॥ सꣳशितंमेब्रह्मसꣳशितंवीर्यंब
लं ॥ सꣳशितंक्षत्रंजिष्णुयस्याहमस्मिपुरोहितः ॥ उदेषांबाहूऽअतिरमुद्वर्चऽउदूबलं ॥ क्षिणोमिब्रह्मणामित्राननुन्नयामि ॥ ३ ॥ स्वाꣳअहं ॥ ह

त्र्यानोरुक्मउर्व्याव्यद्यौदजयद्दुर्मर्षमायुःश्रियेरुचानः॥ अग्निरमृतोऽअभवद्वयोभिर्यदेनंद्यौरजनयत्सुरेताः॥ विश्वारूपाणिप्रतिमुंचतेकविःप्रासा
वीद्भद्रंद्विपदेचतुष्पदे॥ विनाकमख्यत्सवितावरेण्योनुप्रयाणमुषसोविराजति॥ नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकं॰समीची॥ द्यावाक्षा
मारुक्मः॥४॥ अंतर्विभातिदेवाऽअग्निंधारयंद्रविणोदाः॥ सुपर्णोसिगरुत्मांत्रिवृत्तेशिरोगायत्रंचक्षुःस्तोमऽआत्मासामतेतनूर्वामदेव्यंबृहद्र
थंतरेपक्षौयज्ञायज्ञियंपुच्छंछंदांस्यंगानिधिष्णियाःशफायजू॰षिनाम॥ सुपर्णोसिगरुत्मांदिवंगच्छस्वःपत॥५॥ नाभावनेयेनयामिद्धामा
रुक्मोषात्रिं॰शच्च॥१०॥ अग्नेयंयज्ञमध्वरंविश्वतःपरिभूरसि॥ सऽइद्देवेषुगच्छति॥ सोमयास्तेमयोभुवऽऊतयःसंतिदाशुषे॥ तामिर्नोविता
भव॥ अग्निर्मूर्द्धाभुवः॥ त्वंनःसोमयातेधामानि॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनःप्रचोदयात्॥ अचित्तीयच्चकृमादैव्येजनेदीनै
र्दक्षैःप्रभूतीपुरुषत्वता॥१॥ देवेषुचसवितर्मानुषेषुचत्वन्नोऽअत्रसुवतादनागसः॥ चोदयित्रीसूनृतानांचेतंतीसुमतीनां॥ यज्ञंदधेसरस्वती॥ पावी
रवीकन्याचित्रायुःसरस्वतीवीरपत्नीधियंधात्॥ ग्नाभिरच्छिद्रं॰शरणं॰सजोषादुराधर्षंगृणतेशर्मयं॰सत्॥ पूषागाऽअन्वेतुनःपूषारक्षत्वर्वतः॥
पूषावाजं॰सनोतुनः॥ शुक्रंतेऽअन्यद्यजतंतेऽअन्यत्॥२॥ विषुरूपेऽअहनीद्यौरिवासि॥ विश्वाहिमायाऽअवसिस्वधावोभद्रातेपूषन्निहराति

रस्तु॥ तेवर्द्धंतस्वतवसोमहित्वनानाकंतस्थुरुरुचक्रिरेसदः॥ विष्णुर्यद्धावद्वृषणंमदच्युतंवयोनसीदन्नधिबर्हिषिप्रिये॥ प्रचित्रमर्कंगृणतेतुरायमारुता
यस्वतवसेभरध्वं॥ येसहा॰सिसहसासहंते॥३॥ रेजतेऽअग्नेपृथिवीमखेभ्यः॥ विश्वेदेवाविश्वेदेवाः॥ द्यावानःपृथिवीऽइमं॰सिध्रमद्यदिविस्पृशं॥
यज्ञंदेवेषुयच्छतां॥ प्रपूर्वजेपितरानव्यसीभिर्गीर्भिःकृणुध्वं॰सदनेऽऋतस्य॥ आनोद्यावापृथिवीदैव्येनजनेनयातंमहिवांवरूथं॥ अग्नि॰स्तोमेनबो
धयसमिधानोऽअमर्त्यं॥ हव्यादेवेषुनोदधत्॥ सहव्यवाडमर्त्यऽउशिग्दूतश्चनोहितः॥ अग्निर्धियासमृण्वति॥ त्वान्नोभवंतुवाजेवाजे॥ पुरुषत्वतायज
तंतेऽअन्यत्सहंतंत्वनोदितोष्टोच॥११॥ युंजामऽइमामश्वंदेवस्यसंतेविपाजमावसवस्वासमास्त्वोर्ध्वाऽअस्याकृतिंयदस्येयात्वग्नेयंयज्ञमेकादशाव
युंजानोवर्मवस्थऽआदित्यास्त्वाभारतीस्वा॰श्वहद॰षट्चत्वारिं॰शच्च॥ हरिःॐ॥ छ॥ छ॥ छ॥ छ॥ छ॥ १॥ हरिःॐ विष्णोःक्रमोस्यभिमातिहागा
यत्रंछंदऽआरोहपृथिवीमनुविक्रमस्वनिर्भक्तःसयंद्विष्मोविष्णोःक्रमोस्यभिशस्तिहात्रैष्टुभंछंदऽआरोहांतरिक्षमनुविक्रमस्वनिर्भक्तःसयंद्विष्मो
विष्णोःक्रमोस्यरातीयतोहंताजागतंछंदऽआरोहदिवमनुविक्रमस्वनिर्भक्तःसयंद्विष्मोविष्णोः॥१॥ क्रमोसिशत्रूयतोहंतानुष्टुभंछंदऽआरोहदिशो
नुविक्रमस्वनिर्भक्तःसयंद्विष्मः॥ अक्रंददग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमंजन्॥ सद्योजज्ञानोविहीमिद्धोऽअख्यदारोदसीभानुनाभाति

तः॥ अग्नेभ्यावर्त्तिन्नभिनऽआवर्त्तस्वायुषासंत्यामेधयाप्रजयाधनेन॥ अग्ने॥ २॥ अंग्निरःशतंतेसंत्वावृतःसहस्रंतऽउपावृतः॥ तासांपोषस्यपोषे
णपुनर्नोनष्टमाकृधिपुनर्नोरयिमाकृधि॥ पुनरूर्जानिवर्त्तस्वपुनरग्नऽइषायुषा॥ पुनर्नःपाहिविश्वतः॥ सहरय्यानिवर्त्तस्वाग्नेपिन्वस्वधारया
विश्वप्स्न्याविश्वतस्परि॥ उदुत्तमंवरुणपाशमस्मदवाधमं॥ ३॥ विमध्यमंश्रथाय॥ अथावयमादित्यव्रतेतवानागसोअदितयेस्याम ग
स्वाहार्षमंतरभूर्ध्रुवस्तिष्ठाविचाचलिः॥ विशस्त्वासर्वावांछंत्वस्मिन्राष्ट्रमधिश्रय॥ अग्नेबृहन्नुषसामूर्ध्वोऽअस्थान्निर्जगन्वांतमसोज्योतिषागा
त॥ अग्निर्भानुनारुशतास्वंगऽआजातोविश्वासद्मान्यप्राः॥ सीदत्वंमातुरस्याः॥ ४॥ उपस्थेविश्वान्यग्नेवयुनानिविद्वान्॥ मैनामर्चिषामातपसाभिशूशु
चोंतरस्याꣳशुक्रज्योतिर्विभाहि॥ अंतरग्नेरुचात्वमुखायैसदनेस्वे॥ तस्यास्त्वꣳहरसातपंजातवेदःशिवोभव॥ शिवोभूत्वामह्यमग्नेथोसीदशिवस्त्वं
शिवाःकृत्वादिशःसर्वाःस्वांयोनिमिहासदः॥ हꣳसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋ
तजाऽअद्रिजाऽऋतंबृहत्॥ ५॥ दिवमनुविक्रमस्वनिर्भक्तःसयंद्विष्मोविष्णोर्दुहितेनाग्नेयमसस्याःशुचिषत्पोडशाव॥ १॥ दिवस्परिप्रथमंजज्ञेऽ
अग्निरस्मद्द्वितीयंपरिजातवेदाः॥ तृतीयमप्सुनृमणाऽअजस्रमिंधानऽएनंजरतेस्वाधीः॥ विद्मातेऽअग्नेत्रेधात्रयाणिविद्मातेसद्मविभृतंपुरु

पतिष्ठ॥२॥त्रयस्त्रिंशाश्चयस्त्रिय ऽएकादशाव॥११॥वाजोनःसप्तप्रदिशश्चतस्रोवापरावतः॥वाजोनोविश्वैर्देवैर्धनसाताविहावतु॥विश्वेऽअद्य
मरुतोविश्वऊतीविश्वेभवन्त्वग्नयःसमिद्धाः॥विश्वेनोदेवाऽअवसागमंतुविश्वमस्तुद्रविणंवाजोऽअस्मे॥वाजस्यप्रसवंदेवारथैर्याताहिरण्ययैः॥अ
ग्निरिंद्रोबृहस्पतिर्मरुतःसोमपीतये॥वाजेवाजेवतवाजिनोनोधनेषु॥१॥विप्राऽअमृताऋतज्ञाः॥अस्यमध्वःपिबतमादयध्वंतृप्तायातपथि
भिर्देवयानैः॥वाजःपुरस्तादुतमध्यतोनोवाजोदेवाꣳऋतुभिःकल्पयाति॥वाजस्यहिप्रसवोनन्नमीतिविश्वाऽआशावाजपतिर्भवेयं॥पयःपृ
थिव्यांपयऽओषधीषुपयोदिव्यंतरिक्षेपयोधां॥पयस्वतीःप्रदिशःसंतुमह्यं॥संमासृजामिपयसाघृतेनसम्मासृजाम्यपः॥२॥ओषधीभिः
सोहंवाजꣳसनेयमग्ने॥नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकꣳसमीची॥द्यावाक्षामारुक्मोऽअंतर्विभातिदेवाऽअग्निंधारयंद्रविणो
दाः॥समुद्रोसितनभस्वानार्द्रदानुःशंभूर्मयोभूरभिमावाहिस्वाहामारुतोसिमरुतांगणःशंभूर्मयोभूरभिमावाहिस्वाहावस्युरसिदुवस्वांश्छंदो
भूर्मयोभूरभिमावाहिस्वाहा॥३॥धनेषुपोडुवस्वांछंभूर्मयोभूरभिमाहेव॥१२॥अग्निंयुनज्मिशवसाघृतेनदिव्यꣳसुपर्णंवयसंबृहंतं॥तेन
वयंपतेमब्रध्नस्यविष्टपꣳसुवोरुहाणाऽअधिनाकऽउत्तमे॥इमौतेपक्षावजरौपतत्रिणौयाभ्याꣳरक्षांस्यपहꣳस्यग्ने॥ताभ्यांपतेमसुकृता

मुलोकंयत्रऽऋषयःप्रथमजायेपुराणाः॥विदसिसमुद्रयोनिरिंदुर्दक्षःश्येनऽऋतावा॥हिरण्यपक्षःशकुनोभुरण्युर्महान्त्सधस्थेध्रुवः॥१॥आ
निषत्ताः॥नमस्तेऽअस्तुमामाहिꣳसीर्विश्वस्यमूर्द्धन्नधितिष्ठसिश्रितः॥समुद्रेतेहृदयमंतरायुर्द्यावापृथिवीभुवनेष्वर्पितं॥उद्नोदत्तोदधिंभिंतदि
वःपर्जन्यादंतरिक्षात्पृथिव्यास्ततोनोवृष्ट्यावत॥दिवोमूर्द्धासिपृथिव्यानाभिरूर्गपामोषधीनां॥विश्वायुःशर्मसप्रथानमस्पथे॥येनर्षयस्तप
सासत्रं॥२॥आसतेंधानाऽअग्निꣳस्वराभरंतः॥तस्मिन्नहंनिदधेनाकेनाकेऽअग्निमेतंयमाहुर्मनवस्तीर्णबर्हिषं॥तपत्नीभिरनुगच्छेमदे
वाःपुत्रैर्भ्रातृभिरुतवाहिरण्यैः॥नाकंगृह्णानाःसुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः॥आवाचोमध्यमरुहद्भुरण्युरयमग्निःसत्पति
श्चेकितानः॥पृष्ठेपृथिव्यानिहितोदविद्युतदधस्पदंकृणुते॥३॥येपृतन्यवः॥अयमग्निर्वीरतमोवयोधाःसहस्रियोदीप्यतामप्रयुच्छन्॥
विभ्राजमानःसरिरस्यमध्यऽउपप्रयातदिव्यानिधाम॥संप्रच्यवध्वमनुसंप्रयाताग्नेपथोदेवयानान्कृणुध्वं॥अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वे
देवायजमानश्चसीदत॥येनासहस्रंवहसियेनाग्नेसर्ववेदसं॥तेनेमंयज्ञंनोवहदेवयानोयः॥४॥उत्तमः॥उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳ
सृजेथामयंच॥पुनःकृण्वꣳस्त्वापितरंयुवानमन्वाताꣳसीत्त्वयितंतुमेतं॥अयंतेयोनिर्ऋत्वियोयतोजातोऽअरोचथाः॥तंजानन्नग्नऽआरोहाथानो

वर्द्धयारयिं॥५॥ध्रुवःसत्रंकृणुतेयःसपत्निंशत्राव॥१३॥ममाग्नेवर्चोविहवेष्वस्तुवयंत्वेधानास्तन्वंपुषेम॥मह्यंनमंतांप्रदिशश्चतस्रस्त्वयाध्य
क्षेणपृतनाजयेम॥ममदेवाविहवेसंतुसर्वऽइंद्रावंतोमरुतोविष्णुरग्निः॥ममांतरिक्षमुरुगोपमस्तुमह्यंवातःपवतांकामेऽअस्मिन्॥मयिदे
वाद्रविणमायजंतांमय्याशीरस्तुमयिदेवहूतिः॥दैव्याहोतारावनिषंत॥१॥पूर्वेरिष्टाःस्यामतन्वासुवीराः॥मह्यंयजंतुममयानिहव्याकूति
सत्यामनसोमेऽअस्तु॥एनोमानिगांकतमच्चनाहंविश्वेदेवासोऽअधिवोचतामे॥देवीःषडुर्वीरुरुणःकृणोतविश्वेदेवासऽइहवीरयध्वं॥मा
हास्महिप्रजयामातनूभिर्मारधामद्विषतेसोमराजन्॥अग्निर्मन्युंप्रतिनुदंपुरस्तात्॥२॥अदब्धोगोपाःपरिपाहिनस्त्वं॥प्रत्यंचोयंतुनिगुतःपु
नस्तेमैषांचित्तंप्रबुधाविनेशात्॥धाताधातॄणांभुवनस्ययस्पतिर्देवंसवितारमभिमातिषाहं॥इमंयज्ञमश्विनोभाबृहस्पतिर्देवाःपांतु
यजमानंन्यर्थात्॥उरुव्यचानोमहिषःशर्मयंसदस्मिन्हवेपुरुहूतःपुरुक्षु॥सनःप्रजायैहर्यश्वमृडयेंद्रमा॥३॥नोरीरिषोमापराधाः॥ये
नःसपत्नाऽअपतेभवंत्विंद्राग्निभ्यामवबाधामहेतान्॥वसवोरुद्राऽआदित्याऽउपरिस्पृशंमोग्रंचेत्तारमधिराजमक्रन्॥अर्वांचमिंद्रममुतो
हवामहेयोगोजिद्धनजिदश्वजिद्यः॥इमंनोयज्ञंविहवेजुषस्वास्यकुर्मोहरिवोमेदिनंत्वा॥४॥वनिषंतपुरस्तान्मात्रिरस्वारिंशत्राच॥१४॥अग्ने

मन्वेप्रथमस्यप्रचेतसोयंपांचजन्यंबहवःसमिंधते॥विश्वस्यांविशिप्रविविशिवांसमीमहेसनोमुंचत्वंहसः॥यस्येदंप्राणन्निमिषद्यदेजतियस्यजा
तंजनमानंचकेवलं॥स्तौम्यग्निंनाथितोजोहवीमिसनोमुंचत्वंहसः॥इंद्रस्यमन्वेप्रथमस्यप्रचेतसोवृत्रघ्नस्तोमाऽउपमामुपागुः॥योदाशुषःसुकृ
तोहवमुपगंता॥१॥सनोमुंचत्वंहसः॥यःसंग्रामंनयतिसंवशीयुधेयःपुष्टानिसंसृजतित्रयाणि॥स्तौमीन्द्रंनाथितोजोहवीमिसनोमुंचत्वं
हसः॥मन्वेवांमित्रावरुणातस्यतस्यवित्तंसत्यौजसौदृंहणायंनुदेथे॥याराजानंसरथंयाथऽउग्रातानोमुंचतमागसः॥योवांरथऽऋजु
रश्मिःसत्यधर्मामिथुश्चरंतमुपयातिदूषयन्॥स्तौमि॥२॥मित्रावरुणानाथितोजोहवीमितौनोमुंचतमागसः॥वायोःसवितुर्विदथानिमन्महेयावा
त्मन्वद्विशतोयौचरक्षतः॥यौविश्वस्यपरिभूवभूवतुस्तौनोमुंचतमागसः॥उपश्रेष्ठानऽआशिषोदेवयोर्धर्मेऽअस्थिरन्॥स्तौमिवायुंसवि
तारंनाथितोजोहवीमितौनोमुंचतमागसः॥रथीतमौरथीनामह्वऽऊतयेशुभंगमिष्ठौसुयमेभिरश्वैः॥ययोः॥३॥वांदेवौदेवेष्वनिशितमोज
स्तौनोमुंचतमागसः॥यदयातंवहतुंसूर्यायास्त्रिचक्रेणसंसदमिच्छमानौ॥स्तौमिदेवावश्विनौनाथितोजोहवीमितौनोमुंचतमागसः॥मरुतांम
न्वेऽअधिनोब्रुवंतुप्रेमांवाचंविश्वामवंतुविश्वे॥आशून्हुवेसुयमानूतयेतेनोमुंचंत्वेनसः॥तिग्ममायुधंवीडितंसहस्वद्दिव्यंशर्धः॥५॥

पृतनासु जिष्णु ॥ स्तोमिंदेवान्मरुतो नाथितो जोहवीमि ते नोमुंचंत्वंहसः ॥ देवानांमन्वेऽधिनो अस्तु वंतु प्रेमांवाचं विश्वामवंतु विश्वे ॥ आशून्हुवे

सुयमानूतयेते नोमुंचंत्वंहसः ॥ यदिदंमाभिशोचति पौरुषेयेण दैव्ये ॥ स्तोमि विश्वान्देवान्नाथितो जोहवीमि ते नो मुंचंत्वंहसः ॥ अनु नोद्यानु

मतिरनु ॥ ५ ॥ इदनुमते त्वं वैश्वानरो नऽऊत्या पृष्ठो दिवि ॥ येऽअप्रथेताममितेभिरोजोभिर्येप्रतिष्ठेऽअभवतां वसूनां ॥ स्तोमि द्यावापृथिवी

नाथितो जोहवीमि ते नो मुंचंत्वंहसः ॥ उर्वीरोदसी वरिवः कृणोतं क्षेत्रस्य पत्नीऽअधि नो ब्रूयातं ॥ स्तोमि द्यावापृथिवी नाथितो जोहवीमि ते

नो मुंचतमꣳहसः ॥ यत्ते वयं पुरुषत्रा यविष्ठाविद्वाꣳसश्चकृमा कच्च ॥ ६ ॥ आगः ॥ कृधी षु स्माꣳ अदितेरनागान्व्येनाꣳसि शिश्रथो विष्वगग्ने

यथा ह तद्वसवो गौर्यं चित्पदि षितामममुंचता यजत्राः ॥ एवा त्वमस्मत्प्रमुंचा व्यꣳहः प्रातार्यग्ने प्रतरान्नऽआयुः ॥ ७ ॥ गंताइषयन्तो मिययोः त्राद्धो

नुमतिरनु चन चतुस्त्रिꣳशच्च ॥ १५ ॥ अग्नेर्मन्वे प्रथमस्य प्रचेतसः यंपाञ्चजन्यं बहवः समिन्धते ॥ विश्वस्यां विशि प्रविविशिवाꣳसमीमहे स नो मुंचत्वꣳहसः ॥ मन्वे वां तानो मुंचतमागसः ॥ योवां वायो रूपस्थी

तमौ यदयातं तौ नो मुंचतमागसः ॥ मरुतां ति ग्मं देवानां यदिदं ते नो मुंचंत्वंहसः ॥ अनु नऽउर्वी यत्रे नो मुंचतमꣳहसः ॥ चतुरꣳहसः षड꣡ꣳहसश्च

तुरेनसो द्विरꣳहसः ॥ अनु नऽउर्वीयत्रे ॥ अग्नाविष्णू ज्येष्ठꣳ शंयोर्धाक्ष्मायाग्निश्चाꣳ श्रुश्रेधमश्चाग्निश्च घर्म गाभ्रष्ठिका त्वावाजो नो ग्निंयुन

ज्मिममाग्ने ग्नेर्मन्वे पंच दश च ॥ १५ ॥ अग्नाविष्णूऽअग्निश्च वाजो नोऽअद्यं गोपाऽएकान्न चत्वारिꣳशत् ॥ हरिः ॐ ॥ ३९ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

शाके १७९५ भाद्रपद शुद्ध १ चंद्रे उत्तराफल्गुनी नक्षत्रे अयुध्यां देवपुर महानगरे ज्योतिर्विद्रघुनाथसुततरामकृष्णेन लिखितं शुभं छ छ छ छ

॥ इति श्रीयजुर्वेदे संहितायां चतुर्थोऽष्टकः समाप्तः ॥ छ ॥ छ ॥ छ ॥ शुभं ॥ १ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ श्रीराम ॥

या.

॥ अथ यज्ञोपवीतकरणप्रतिष्ठाविधिः ॥ तदुक्तमापस्तंबसूत्रे । प्रसृतो ह वै यज्ञोपवीत इत्यादिश्रुतेः ॥ सदोपवीतिना भूत्वा
दि·आचम्यामिति नियज्ञोपवीतं धार्यं । यएवं नाभिज्ञानाति ब्रह्मसूत्रसमुद्भवं ॥ वेदोक्तं निःफलं तस्य यज्ञदानजपादिकं ॥ त्रिवृ
न्महः ॥ विधानेन विना यज्ञोपवीतं सूत्रं गोकंठरज्जुवत् ॥ भरद्वाजः ॥ ब्राह्मणो योऽज्ञानात् त्रिउपवीतस्य तांस्थितौ ॥ गोहत्यादे
हत्याचारं प्राशुजौरिवस्सर्वदा ॥ तस्मादुपवीतस्य विधानमवश्यं विज्ञेयं ॥ तच्चन महर्षिभिरुक्तं निष्कृष्य भाव्यते ॥ करणकार्यं
तत्कार्ये प्रयोगात् पूर्वकार्यं ॥ तत्कार्यं यथा स्यात् ॥ स्वाध्यायदिवसे शुक्लपक्षे पूर्वाह्णे प्राचीमुदीचीं वा दिशं निष्क्रम्य देवाग
रे नदीतीरे गोष्ठे शुचौ देशे वा सुस्थाने प्रयतोऽध्वोर्ध्वपुंड्रोत्तरीयबद्धशिखो द्विराचम्य दर्भासने प्राङ्मुखः समुपविश्य प्रा
णानायम्य तिथ्यादिसंकीर्त्य पुराणोक्तफलसंयुताविधिना निर्मितकार्पाससूत्रमादाय प्रणवेनाभिमंत्र्य आपोहिष्ठा इत्यादि त्रिर
भिप्रोक्ष्य । ॐ आपोहिष्ठा इदं सर्वं विश्वा ता न्यापः सत्यमापः प्रणमो माऽपापः ॥ सर्वदेवताः पोऽन्तर्लुं नः स्वरापोम् ॥ ॐ सत्यप्रण

वपूर्वकं व्याहृतित्रयं जपीत्वा चतुरंगुलमानेन दक्षिणहस्तेन मध्यमपर्वबहिः संख्यातान् सूत्रं षण्णवतिं त्रिगुणीकृत्य व्याहृतिभिः प्रक्षाल्य कूर्वो-
परि निधाय । ॐ आपो हिष्ठा मयोभुवः हिरण्यवर्णाः शुचयः पावकाः ॥ इत्येतैर्मन्त्रैस्तत्सूत्रं दर्भैर्मार्जयित्वा अंशुना प्रत्यङ्मुखेन प्र-
ध्ययहीत्वा अग्नेः प्राङ्मुखो द्वौ विप्रौ स्थापयित्वा अंशुना प्रत्यङ्मुखेन दक्षिणहस्ताग्रेऽङ्गुष्ठेन चेत्यनुयाकेनोर्ध्वं रत्नं सूत्रं वस्त्वरित्यनुयोके न
च पाणिभ्यामनुवर्त्य दक्षैर्दृष्ट्वा शुचौ देशे दर्भोपरि तेन समायं द्वौ दक्षैर्दत्वा त्रिः करद्वौ निक्षिप्त्वा तत्सूत्रं लम्बमानेनावेष्टेत ॥ नीरमादाय
अग्न्यादिया ह्रीं हूं हेभ्यस्तेभ्यो नमः इति बद्ध्वा ग्रन्थिं सूत्रं कुण्डलं प्रणवव्याहृतिभिः ऋजुं कृत्वा सूत्रं त्रिवलीकृत्योग्रेण मंत्रमंगु-
ष्ठाभ्यां सूत्रं परिवेष्ट्य ग्रन्थिं त्रिवारं ग्रंथिरशीर्षमाविशन्तु कस्तोन्ये नो नाप्यस्य ॥ अंगुष्ठमात्रः पुरुषः अंगुष्ठे च समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक् ॥ अग्नेर्नवादिमायत्री मशायवायां प्रणवव्याहृतिभिः सूत्रं निहितं च शुचौ देशे ब-
हिः स्थंडिलोपरि प्रार्णमावेष्टितेजनस्पूरैर्ता मपाश्रेस्सूर्यसुते तां शापांनिः हित्य प्रणवव्याहृतिभिर्गंधादिभिश्चाभ्यर्च्य प्राणाना-
मस्य यज्ञोपवीतप्रतिष्ठां करिष्ये ॥ इति संकल्प्य दक्षिणहस्तेन यज्ञोपवीतं स्पृशन् । ॐ भूः यज्ञोपवीतं प्रतिष्ठापयामि ॐ भुवः

भ
यज्ञोपवीतं प्रतिष्ठापयामि ॐ स्वः यज्ञोपवीतं प्रति० इति प्रतिष्ठापयेत् ॥ अग्निश्चेति दक्षिणहस्ते । भुवो वायुश्चेति मध्यमा-
ङ्गुष्ठे स्वरादित्यश्चेति उत्तराङ्गुष्ठे अनुवर्तयेदित्याह ॥ भगवान् बोधायनः ॥ अथ नवतन्तुदेवतास्वाधिदेवता यज्ञोपवीतदे-
वता आवाहयेत् । गंधादिभिरभ्यर्च्य स्वर्णारितो ज्ञानवायुरवं प्राणः त्रयस्तथा क्रमात् ॥ नव तन्तुषु तंतवानाम् अधिदेवताः
संपीत्र यमस्याप्यधिपतयः पितामह हरीश्वराः ॥१॥ यज्ञोपवीताकारस्य परब्रह्मादिदैवतम् ॥ इति ॥ इति भरद्वाजः ॥ ॐकार-
प्रथमतन्तौ द्वितीयोऽग्निस्तथैव च ॥ तृतीयो नागदैवत्यो चतुर्थः सोमदैवतः ॥ पञ्चमः पितृदैवत्यः षष्ठश्चैव प्रजापतिः ॥
सप्तमो ब्रह्मदैवत्यः अष्टमो सूर्य एव च नवमः सर्वदैवत्य इत्येते नव तन्तवः ॥ इति देवपी देवजे द्व्याचक्षे ॥ तद्देवता-
देवता प्रतिष्ठाप्य तं यज्ञोपवीतमादाय । आदित्येन लक्षणेः सवित्रे प्रदर्शय पूर्ववत् निधायोपविश्य । अथ शतगायत्र-
र्त्री जपीत्वा तत्र ब्रह्मसूत्रं धारणार्थं दिक्षु द्वौ द्वौ नादो प्रदर्शय अपदित अभ्य दर्भासने उपविश्य । पवित्रमाणी पाणिना
यज्ञोपवीतं स्पृशन् अंबक मंत्रं साक्रन्दजापित्वा सहस्रं वैकं द्विदेवतां यज्ञोपवीतं परमं पवित्रमिति मंत्रेणामदक्षिणबा

ॐ नमः कृत्य शिरस्नात्स्त हस्तमांशे निःक्षिपेत् ॥ स्नानंतरोज्वद्दक्षिणं बाहुं कुर्यात् ॥ यज्ञोपवितमेतेनो आरम्य चमेन भगवान् उपविश्य
रातेच्छन्नं पाणिः प्राणायामपरः नाग्यतः ॥ मंत्रं सदैवतं गुणार्थं ब्रह्मसूत्रे गजेन्द्रिये ॥ रुपवीतं बरोरेवं हृतपितरमोक्षणेषु
॥ एकमेव यतीनां स्यादिति सौत्रार्थनिश्चयः ॥ तत्र मनुः ॥ एकमेवोपवीतं स्याद्दण्डं तान्त्रमिलोर्ध्वयोः ॥ दशाहे वाग्रहस्थस्य चत्वारि
वनवासिनः ॥ इति कामनयेत्यादि पाठं प्रचक्षते ॥ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि ॥ तृतीयमुपवीतं तु वस्त्राभावेन
देवहि ॥ सोत्तरायं ग्रहस्थस्य तथैव वनवासिनः ॥ इत्यापस्तंब सूत्रे यज्ञोपवीतप्रतिष्ठा मंत्राधिकाः उक्ता ॥ १ ॥
इति यज्ञोपवीतप्रतिष्ठाविधिः ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ श्री